A.C. Joshi Library
P.U. Chandigarh

MSS No. 198 Subject Philosophy

Name of MSS तर्कसंग्रह दीपिका

Author अनन्तदेवोपाध्याय

Period – – Folios 16

Script Sanskrit Source Prithipal Singh, Amritsar

Missing Folios

198

198

न्याय ग्रं० - तर्क संग्रह
दीपिका टीका

११८६९६

जे दैरू पविता
सिनौरूषकारी
कामस्यावि घास
नौ ज्ञानै मद करी
जपकृपाकरी
धामस्याके स्वसनौ नि स्वतनौ
पुत्रभ्रात्र स्वलत्रमेदनकरी
लज्जाकलदुप्रीनौ सामोबाधारो
सर्वदेशाव जलनौ प्राप्त महाराजुआए ,

Sans. MS. 181.4		
T187		
198-MS		तर्कसंग्रहदीपिका अनन्तदेवोपाध्याय कृत ॥ खंडित तथा कीटभक्षित 15 पत्रक ॥ ल० प० 13 पं० प्र० पृ०
		ह० ल०

श्रीगणेशाय नमः ॥ विश्वेश्वरं सांबमूर्त्तिं प्रणिपत्य गिरां गुरुं ॥ टीकां शिशुहितां कुर्वे तर्कसंग्रहदीपिकां ॥१॥ चिकी
र्षितस्य ग्रंथस्य अविघ्नपरिसमाप्त्यर्थं शिष्टाचारानुमितश्रुतिबोधितकर्त्तव्यताकं इष्टदेवतानमस्कारलक्ष
णं मंगलं शिष्यशिक्षार्थं निबध्नन् चिकीर्षितं प्रतिजानीते । निधायेति नतु मंगलस्य समाप्तिसाधनत्वं नास्ति मंग
ले कृतेपि किरणावल्यादौ समाप्त्यदर्शनात् मंगलाभावेपि कादंबर्यादौ समाप्तिदर्शनात् अन्वयव्यतिरेकव्यभि
चारादिति चेन्न किरणावल्यादौ विघ्नबाहुल्यात् समाप्त्यभावः कादंबर्यादौ ग्रंथाद्बहिरेव मंगलं कृतं अतो न
व्यभिचारः नतु मंगलस्य कर्त्तव्यत्वे किं प्रमाणमिति चेन्न शिष्टाचारानुमितश्रुतेरेव प्रमाणत्वात् तथाहि मंग
लं वेदबोधितकर्त्तव्यताकं अलौकिकाविगीतशिष्टाचारत्वात् दर्शादिवत् भोजनादौ व्यभिचारवारणाय अलौ
किकेति रात्रिश्राद्धादौ व्यभिचारवारणाय अविगीतेति शिष्टपदं स्पष्टार्थं न कुर्यान्निष्फलं कर्मेति जलताडनादे
रपि निषिद्धत्वादिति तर्क्यंते प्रतिपाद्यंते इति तर्काः द्रव्यादिपदार्थाः तेषां संग्रहः संक्षेपेण स्वरूपकथनं क्रिय
ते इत्यर्थः कस्मै प्रयोजनायेत्यत आह सुखबोधायेति सुखेन अनायासेन बोधः पदार्थज्ञानं तस्मा इत्यर्थः ननु

वहुश्रुतर्कसंग्रहेषु सत्सु किमर्थमपर्वसंग्रहः क्रियत इत्यत आह बालानामिति तेषां अतिविस्तृतत्वात् बालानां बो
धनाय भवतीत्यर्थः ग्रहणधारणापटुर्बालः न तु स्तनंधयः किं कृत्वा क्रियत इत्यत आह निधायेति विश्वेश्वरं
जगन्नियंतारं सांबशिवं हृदि निधाय नितरां स्थापयित्वेत्यर्थः पदार्थान् विभजते द्रव्येति पदस्यार्थः पदार्थः
इति व्युत्पत्त्या अभिधेयत्वं पदार्थसामान्यलक्षणं ननु विभागादेव सप्तत्वे लब्धे सप्तग्रहणं व्यर्थमिति चेन्न अधि
कसंख्याव्यवच्छेदार्थत्वात् नन्वतिरिक्तः पदार्थः प्रमितो न वा नाद्यः प्रमितस्य निषेधायोगात् प्रतियोगिप्रमितिं प्रमि तो न्यः
विना निषेधानुपपत्तेरिति चेन्न पदार्थत्वं द्रव्यादिसप्तान्यतमत्वव्याप्यमिति व्यवच्छेदार्थत्वात् एवमग्रेऽपि द्रष्टव्यं
द्रव्याणि विभजते तत्रेति तत्र द्रव्यादिमध्ये द्रव्याणि नवेत्यन्वयः कानि तानीत्यत आह पृथ्वीत्यादि ननु तमसो
दशमद्रव्यस्य विद्यमानत्वात् कथं नव द्रव्याणि तथाहि नीलं तमश्चलतीत्यबाधितप्रतीतिबलात् नीलरूपा
धारतया क्रियाधारतया च द्रव्यत्वं तावत्सिद्धं तत्र तमसो नाकाशादिपंचकेऽन्तर्भावः रूपवत्वात् अत एव न वायौ स
दागतिमत्त्वाभावाच्च नापि तेजसि भास्वररूपाभावात् उष्णस्पर्शरहितत्वाच्च नापि जले शीतस्पर्शाभावात् नील
रूपाश्रयत्वाच्च नापि पार्थिव्यां गंधाभावात् स्पर्शरहितत्वाच्च तस्मात्तमो दशमं द्रव्यमिति चेन्न तमसस्तेजोभाव

२
त॰ टी॰

रूपवत्वात् तथाहि तमो हि न रूपवद्द्रव्यं आलोकासहकृतचक्षुर्ग्राह्यत्वात् आलोकाभाववत् रूपे चाक्षुषप्रमा
यामालोकस्य कारणत्वात् तस्मात्प्रौढप्रकाशकतेजःसामान्याभावः तमः नीलं तत्र नीलं तमश्चलतीति प्रत्ययो भ्र
मः अतो न वद्रव्याणीति सिद्धं द्रव्यत्वजातिमत्वं गुणवत्वं द्रव्यसामान्यलक्षणं लक्ष्यैकदेशावृत्तित्वमव्याप्तिः य
थागोः कपिलत्वं अलक्ष्यवृत्तित्वमतिव्याप्तिः। यथा गोः शृङ्गित्वं। लक्ष्यमात्रावर्तित्वमसंभवः। यथा गोरेकशफवत्वं।
तत्र दूषणत्रयरहितो धर्मो लक्षणं। स एवासाधारणधर्म इत्युच्यते। लक्ष्यतावच्छेदकसमनियतत्वमसाधारण
त्वं॥ व्यावर्त्तकस्यैव लक्षणत्वे व्यावर्त्तकाभिधेयत्वादौ अतिव्याप्तिवारणाय तद्भिन्नत्वं धर्मविशेषणं देयं। व्यवहारस्यापि
लक्षणप्रयोजनत्वे न देयं। व्यावृत्तेरपि व्यवहारस्यापि लक्षणसाध्यत्वात्। ननु गुणवत्वं न द्रव्यलक्षणं आद्यक्षणे उत्पन्न
विनष्टद्रव्ये चाव्याप्तेरिति चेन्न। गुणसमानाधिकरणसत्ताभिन्नजातिमत्वस्य विवक्षितत्वात्। ननु एवमपि एकं रूपं रस
त्वपृथगिति व्यवहारात्। रूपादौ अतिव्याप्तिरिति चेन्न। एकार्थसमवायादेव तादृशव्यवहारोपपत्तेः गुणे गुणानङ्गीकारात्।
गुणं विभजते रूपेति। द्रव्यकर्मभिन्नत्वे सति सामान्यवान् गुणः। गुणत्वजातिमान्वा। ननु लघुत्वकठिनत्वादीनां विद्यमा
न गुणाः। गुणजातित्वात्। कथं चतुर्विंशतिगुणा इति चेन्न। लघुत्वस्य गुरुत्वाभावरूपत्वात्। मृदुत्वकठिनत्वयोः अव
यवसंयोगविशेषरूपत्वात्। कर्म विभजते॥ उत्क्षेपणेति। संयोगभिन्नत्वे सति संयोगासमवायिकारणं कर्म। कर्मत्वजाति

२
तर्क॰ दी॰

मत्वाश्रमणादीनामपिगमनेंतर्भावात्।नपंचत्वविरोधः।सामान्यंविभजते परमिति।परमधिकवृत्ति।अपरंन्यूनवृ
त्ति।सामान्यादिचतुष्टयेजातिर्नास्ति।विशेषंविभजते नित्येति।पृथिव्यादिचतुष्टयस्यपरमाणवः।आकाशादि
पंचकंचनित्यद्रव्याणि।समवायस्यभेदोनास्तीत्याह।समवायस्त्विति।अभावंविभजते।प्रागभावइति।तत्रउद्दे
घ४ शानुक्रमानुसारात्प्रथमंपृथिव्यालक्षणमाह।गंधवतीति।नाम्नापदार्थसंकीर्त्तनमुद्देशः।उद्देशक्रमेचसर्वत्रे
च्छैवनियामिका।ननुसुरभ्यसुरभ्यवयवारब्धेद्रव्येपरस्परविरोधेनगंधानुत्पादादव्याप्तिः।नचतत्रगंधप्र
तीत्यनुपपत्तिरितिवाच्यं।अवयवगंधस्यैवतत्रप्रतीतिसंभवेनचित्रगंधानंगीकारात्।किंचोत्पन्नविनष्टघटा
दावव्याप्तिरितिचेन्न।गंधसमानाधिकरणद्रव्यत्वापरजातिमत्त्वस्यविवक्षितत्वात्।ननुजलादावपिगंधप्रतीतेर
तिव्याप्तिरितिचेन्न।अन्वयव्यतिरेकाभ्यांपृथिवीगंधस्यैवतत्रभानांगीकारात्।ननुतथापिकालस्यसर्वाधारतया
सर्वेषांलक्षणानांकालेऽतिव्याप्तिरितिचेन्न।सर्वाधारतयाप्रयोजकसंबंधभिन्नसंबंधेनलक्षणसत्त्वस्याभिमत
त्वात्।पृथिवींविभजते।साद्विविधेति।नित्यत्वंध्वंसाप्रतियोगित्वं।ध्वंसप्रतियोगित्वमनित्यत्वं।प्रकारांतरेणविभजते

नि॰॥ जलसंबंधादेव शीतस्पर्शभावमिति नातिव्याप्तिः॥ अन्यत्सर्वं पूर्ववदीत्या व्याख्येयं॥ उष्णस्पर्शवदिति ६

तर्क॰ दी॰ ~~पुनरिति~~ पुनरिति। आत्मनो भोगायतनं शरीरं। यदवच्छिन्नात्मनि भोगो जायते तद्भोगायतनं। सुखदुःखसाक्षात्का
रो भोगः। शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वं इंद्रियत्वं॥ शरीरेंद्रियभिन्नो वि
षयः। एवं च गंधवच्छरीरं। पार्थिवशरीरं। गंधवदिंद्रियं। गंधवान्विषयः। पार्थिवशरीरं दर्शयति। शरीरमि
ति। इंद्रियं दर्शयति। इंद्रियमिति। गंधग्राहकमिति प्रयोजनकथनं। घ्राणमिति संज्ञा नासाग्रेत्याश्रयो[...]एवमुत्तरत्रे
यं। पार्थिवविषयं दर्शयति। मृत्पाषाणेति। अपांलक्षणमाह। शीतेति। उत्पन्नविनष्टजले अव्याप्तिवारणाय। शीतस्पर्श
समानाधिकरणद्रव्यत्वापरजातिमत्त्वे तात्पर्यं। शीतं शिलातलमित्यादौ उष्णं जलमिति प्रतीतेः। तेजःसंबंधानुविधा
यित्वात्॥ नातिव्याप्तिः॥ विषयं विभजते। सामेति। ननु सुवर्णं पार्थिवं पीतत्वात् गुरुत्वात्। हरिद्रादिवदिति चेन्न। अत्यंतानल
जलमध्यस्थघृते नाशादर्शनेन संयोगे सति घृतादौ द्रवत्वनाशदर्शनेनोऽसति प्रतिबंधे पार्थिवद्रवत्वनाशाग्निसंयोगयोः (नाशदर्शनेन जलमध्यस्थ
घृते नाशादर्शनेन) कार्यकारणभावावधारणात् सुवर्णस्य अत्यंतानलसंयोगे सति अनुच्छिद्यमानद्रवत्वाधिकरण
त्वेन पार्थिवत्वानुपपत्तेः तस्मात्पीतद्रव्यद्रवत्वनाशप्रतिबंधकतया द्रवाद्रव्यांतरसिद्धौ नैमित्तिकद्रवत्वाधिकरणतया

२ त॰ दी॰

मलत्वानुपपत्तेः रूपवत्त्वाभावाद्वाय्वादिष्वन्तर्भावे तैजसत्वसिद्धिः तस्य तु उष्णस्पर्शभास्वररूपयोः उपष्टंभकपार्थिवरूपस्प
र्शाभ्यां प्रतिबंधादनुपलब्धिः। तस्मात्सुवर्णं तैजसमिति। वायुं लक्षयति। रूपरहित इति। आकाशादावतिव्याप्तिवारणाय स्पर्श
वानिति। पृथिव्यादावतिव्याप्तिवारणाय रूपरहित इति। ननु प्राणस्य कुत्रांतर्भाव इत्यत आह। शरीरेति संचेति। एक एव प्राणः स्था
नभेदात् प्राणापानादिशब्दैर्व्यवह्रियत इत्यर्थः। स्पर्शानुमेयो वायुः। तथा हि। योऽयं वायौ वाति सति अनुष्णाशीतस्पर्शो भासते
स स्पर्शः क्वचिदाश्रितः गुणत्वात् रूपवत्। न चास्य पृथिव्याश्रयः। उद्भूतस्पर्शपार्थिवस्य उद्भूतरूपवत्त्वनियमात्। न जलतेज
सी अनुष्णाशीतत्वात्। न विभुचतुष्टयं सर्वत्रोपलब्धिप्रसंगात्। न मनः परमाणुस्पर्शस्यातींद्रियत्वात्। तस्माद्यः प्रती
यमानः स्पर्शाश्रयः स वायुः। ननु वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वात्। घटवदिति चेन्न। उद्भूतरूपवत्त्वस्योपाधित्वात्॥
यत्र द्रव्यत्वे सति बहिरिंद्रियप्रत्यक्षत्वं तत्र उद्भूतरूपवत्त्वमिति साध्यव्यापकत्वं पक्षे साधनाव्यापकत्वं। न चैवं तप्तवारिस्थ
तेजसोऽप्यप्रत्यक्षत्वापत्तिः इष्टत्वात्। तस्मात् रूपरहितत्वात् वायुरप्रत्यक्षः। इदानीं कार्यरूपपृथिव्यादिचतुष्टयस्य
उत्पत्तिविनाशक्रमः कथ्यते ईश्वरस्य चिकीर्षावशात् परमाणुषु क्रिया जायते ततः परमाणुद्वयस्य संयोगे द्व्यणुकं

४
त॰ दी॰

कमुत्पद्यते॥ त्रिभिर्द्व्यणुकैः त्र्यणुकं। एवं चतुरणुकादि। द्रव्यस्य संजिहीर्षावशात् क्रियया परमाणुद्वयविभागे सति
द्व्यणुकनाशः। ततस्त्र्यणुकस्य ततश्चतुरणुकस्य इत्येवं पृथिव्यादिनाशः। असमवायिकारणनाशाद्द्व्यणुकनाशः। स
मवायिकारणनाशात्त्र्यणुकनाश इति संप्रदायः। सर्वत्र असमवायिकारणनाशाद्द्रव्यनाश इति नवीनाः। किं पुनः परमा
णुसद्भावे प्रमाणं॥ उच्यते॥ जालसूर्यमरीचिस्थं सर्वतः सूक्ष्मतमं यद्दृश्यते तत्सावयवं चाक्षुषद्रव्यत्वात् पटवत्। द्व्यणुकावय
वोपि सावयवः महदारंभकत्वात्। तंतुवत्। यो द्व्यणुकावयवः स एव परमाणुः स च नित्यः कार्यत्वे अनवस्थाप्रसंगात्॥ सृ
ष्टिप्रलयसद्भावे धाता यथापूर्वमकल्पयदित्यादिश्रुतिः प्रमाणं॥ सर्वकार्यद्रव्यध्वंसः अवांतरप्रलयः। सर्वभावकार्यध्वंसो
महाप्रलय इति विवेकः॥ आकाशं लक्षयति॥ शब्दगुणकमिति॥ नन्वाकाशमपि किं पृथिव्यादिवन्नाना नेत्याह। तच्चैकमिति॥
भेदप्रमाणाभावादित्यर्थः॥ एकत्वादेव सर्वत्रोपलब्धेर्विभुत्वमंगीकर्तव्यमित्याह॥ विभ्विति। सर्वमूर्तद्रव्यसंयोगित्वं विभु
त्वं॥ मूर्तत्वं परिछिन्नपरिमाणवत्वं॥ क्रियावत्वं वा। विभुत्वादेव आत्मवत्॥ नित्यत्वमित्याह॥ नित्यं चेति। कालं लक्षयति। अतीतेति॥
सर्वाधारः कालः सर्वकार्यनिमित्तकारणं च॥ दिशो लक्षणमाह॥ प्राचीति दिगपि कार्यमात्रे निमित्तकारणं॥ आत्मनो लक्षण

४
त॰ दी॰

माह॥ ज्ञानेति॥ आत्मानं विभजते॥ सद्विविधेति। परमात्मनो लक्षणमाह॥ तत्रेति॥ नित्यज्ञानाधिकरणत्वं ईश्वरत्वं। ननु
ईश्वरसद्भावे किं प्रमाणं न तावत्प्रत्यक्षं। तद्धि बाह्यमान्तरं वा। नाद्यः। अरूपिद्रव्यत्वात्॥ नान्त्यः। आत्मसुखादिव्यतिरिक्तत्वा
त्। नाप्यनुमानं लिंगाभावादिति चेन्न। अंकुरादिकं कर्तृजन्यं कार्यत्वात्॥ घटवदित्यनुमानस्य प्रमाणत्वात्। उपादानगोचरा
परोक्षज्ञानचिकीर्षाकृतिमत्त्वं कर्तृत्वं। उपादानं समवायिकारणं। सकलपरमाण्वादिसूक्ष्मदर्शित्वात् सर्वज्ञत्वं। यः सर्वज्ञः
सर्वविदित्यागमोपि तत्र प्रमाणं॥ जीवस्य लक्षणमाह। जीव इति। सुखादिकं जीवलक्षणं॥ ननु मनुष्योहं॥ ब्राह्मणोहं। इत्या
दौ सर्वत्र अहंप्रत्यये शरीरस्यैव विषयत्वात्। शरीरमेवात्मेति चेन्न। शरीरस्य करपादादिनाशे शरीरनाशात् आत्म
नोपि नाशप्रसंगात्। नापि इंद्रियाणां आत्मत्वं योहं घटमद्राक्षं सोहमिदानीं स्पृशामीत्यनुसंधानाभावप्रसंगात्। अन्या
नुभूतेऽन्यस्याननुसंधानायोगात्। तस्माद्देहेंद्रियव्यतिरिक्तो जीवः सुखदुःखादिवैचित्र्यात् प्रतिशरीरं भिन्नः। स च न
परमाणुः शरीरव्यापिसुखाद्यनुपलब्धिप्रसंगात्। मध्यमपरिमाणः॥ तथा सत्यनित्यत्वप्रसंगे कृतनाशाकृताभ्यागम
प्रसंगात् तथा च तस्मान्नित्यो विभुश्च जीवः॥ मनसो लक्षणमाह॥ सुखेति॥ स्पर्शरहितत्वे सति क्रियावत्त्वं मनसो लक्षणं म
नो विभजते॥ तच्चेति॥ एकैकस्यात्मन एकैकं मनः इत्यात्मनामनेकत्वात्। मनसोप्यनेकत्वमित्यर्थः। परमाणुरूपमि

ति॥ मध्यमपरिमाणत्वे॥ अनित्यत्वप्रसंगादित्यर्थः॥ ननु मनो विभु स्पर्शरहितद्रव्यत्वात्॥ आकाशवदिति चेन्न॥ मनसो विभुत्वे
आत्ममनःसंयोगस्यासमवायिकारणस्याभावात् ज्ञानानुत्पत्तिप्रसंगात्॥ न च विभुद्वयस्य संयोगोऽस्त्विति वाच्यं॥ तत्संगस्य नित्य
त्वेन सुषुप्त्यभावप्रसंगात्॥ पुरीतत्व्यतिरिक्तप्रदेशात्ममनःसंयोगस्य सर्वदा विद्यमानत्वात्॥ अणुत्वे यदा मनः पुरीतति प्रविश
ति तदा सुषुप्तिः॥ यदा निःसरति तदा ज्ञानोत्पत्तिरित्यणुत्वसिद्धिः॥ रूपं लक्षयति॥ चक्षुरिति॥ संख्यादावतिव्याप्तिवारणाय मात्र
पदं॥ रूपत्वेऽतिव्याप्तिवारणाय गुणपदं॥ ननु अव्याप्यवृत्ति नीलादिसमुदाय एव चित्ररूपमिति चेन्न॥ रूपस्य व्याप्यवृत्तित्व
नियमात्॥ ननु चित्रपटेऽवयवरूपस्य प्रतीतिरिति चेन्न॥ रूपरहितत्वेन पटस्याप्रत्यक्षत्वप्रसंगात्॥ न च रूपवत्समवेतत्वं
प्रत्यक्षत्वप्रयोजकं॥ गौरवात्॥ तस्मात् पटस्य प्रत्यक्षानुपपत्त्या चित्ररूपसिद्धिः॥ रसं लक्षयति॥ रसनेति॥ रसत्वेऽतिव्याप्तिवार
णाय गुणपदं॥ रसस्याश्रयमाह॥ पृथिवीति॥ आश्रयं विभज्य दर्शयति॥ पृथिव्यामिति॥ गंधं लक्षयति॥ घ्राणेति॥ गंधत्वेऽतिव्या
प्तिवारणाय गुणपदं॥ स्पर्शं लक्षयति॥ त्वगिति॥ स्पर्शत्वेऽतिव्याप्तिवारणाय गुणपदं॥ संयोगादावतिव्याप्तिवारणाय मात्रप
दं॥ पाकजमिति॥ पाकः तेजःसंयोगः॥ तेन पूर्वरूपं नश्यति रूपान्तरमुत्पद्यत इत्यर्थः॥ अत्र परमाणुष्वेव पाकः॥ न द्व्यणुकादौ
आपाकनिक्षिप्तघटे परमाणौ रूपांतरोत्पत्तौ श्यामघटनाशे पुनर्द्व्यणुकादिक्रमेण रक्तघटोत्पत्तिः॥ अत्र परमाणवः सम
त।

वायिकारणं तेजःसंयोगः॥ असमवायिकारणं॥ अदृष्टादिकं निमित्तकारणं॥ घटादिरूपे कारणरूपं॥ असमवायिकार
णमिति पीलुपाकवादिनः॥ पूर्वघटस्य घटस्य नाशं विनैवावयवावयवेषु परमाणुपर्यन्तेषु युगपत् रूपान्तरोत्पत्तिरिति
पिठरपाकवादिनो नैयायिकाः॥ अतएव पार्थिवपरमाणुरूपादिकमनित्यमित्यर्थः। अन्यत्र जलादावित्यर्थः॥ नित्यग
तमिति। परमाणुगतमित्यर्थः। अनित्यगतमिति। घटादिनिष्ठमित्यर्थः। रूपादिचतुष्टयमुद्भूतं प्रत्यक्षं। अनुद्भूतत्वे
प्रत्यक्षत्वप्रयोजको धर्मः॥ तद्भ्रेकं दनावः॥ अनुद्भूतत्वं। संख्यां लक्षयति। एकेति। परमाणं लक्षयति। मानेति॥ परमाणंअ
ते॥ नज्ञेति॥ भावप्रधानो निर्देशः॥ अणुत्वमहत्त्वदीर्घत्वह्रस्वत्वं चेत्यर्थः॥ पृथक्त्वं लक्षयति॥ पृथगिति॥ इदमस्मात्पृथगिति
व्यवहारकारणमित्यर्थः॥ संयोगं लक्षयति॥ संयुक्तेति॥ इमौ संयुक्ताविति व्यवहारहेतुरित्यर्थः॥ संख्यादिलक्षणेषु
सर्वत्र दिक्कालादौ अतिव्याप्तिवारणाय। असाधारणेति। संयोगो द्विविधः। कर्मजः संयोगजश्च। आद्यः हस्तक्रिय
यापुस्तकसंयोगः॥ द्वितीयो हस्तपुस्तकसंयोगात् कायपुस्तकसंयोगः॥ अव्याप्यवृत्तिः संयोगः। स्वात्यन्ताभावस
मानाधिकरणत्वमव्याप्यवृत्तित्वं॥ विभागं लक्षयति॥ संयोगेति। कालादावतिव्याप्तिवारणाय गुणेति। रूपादाव
तिव्याप्तिवारणाय संयोगविनाशकेति। विभागोऽपि कर्मजो विभागजश्च। आद्यो हस्तपुस्तकविभागः। द्वितीयः कायपुस्त

त. दी. ६

कः विभागः॥ परत्वापरत्वयोर्लक्षणमाह॥ परापरेति। परव्यवहारकारणं परत्वं। अपरव्यवहारकारणं अपरत्वमि
त्यर्थः। विभजते। द्विविधे इति। दिक्कृतयोरुदाहरणमाह। दूरस्थ इति। कालकृते उदाहरति। ज्येष्ठ इति। गुरुत्वं लक्षय
ति। आद्येति। द्वितीयादिपतनस्य वेगासमवायिकारणत्वात्। वेगे अतिव्याप्तिवारणाय आद्येति। द्रवत्वं लक्षयति स्यंद
नेति। स्यंदनं स्रवणं। तेजःसंयोगजन्यं नैमित्तिकं॥ तद्भिन्नं सांसिद्धिकं। पृथिव्यां नैमित्तिकमुदाहरति। घृतादाविति। तेजसि तद
हा सुवर्णादाविति। स्नेहं लक्षयति। चूर्णेति। कालादावतिव्याप्तये गुणेति। रूपादौ तदर्थं पिंडीभावेति॥ शब्दं लक्षयति।
श्रोत्रेति। शब्दत्वादावतिव्याप्तये गुणेति। रूपादावतिव्याप्तये श्रोत्रेति। शब्दस्त्रिधा संयोगजो विभागजः शब्दजश्चेति। आद्यो भेरी
दंडसंयोगजः। द्वितीयो वंशे पाट्यमाने दलद्वयविभागजन्यश्चटचटाशब्दः॥ भेर्यादिदेशमारभ्य श्रोत्रपर्यंतं द्वितीयादिशब्दाः
शब्दजाः॥ बुद्धिं लक्षयति बुद्धिरिति। जानामीत्यनुव्यवसायगम्यज्ञानत्वमेव तल्लक्षणं॥ बुद्धिं विभजते। सेति। स्मृतिं लक्षयति। सं
स्कारेति। भावनाख्यः संस्कारः। संस्कारध्वंसे घटादिप्रत्यक्षे वा नातिव्याप्तये ज्ञानसंस्कारजन्यपदं। अनुभवं लक्षयति। तद्भिन्नमिति
स्मृतिभिन्नं ज्ञानमनुभवमित्यर्थः॥ अनुभवं विभजते। तद्द्विविधं। यथार्थानुभवस्य लक्षणमाह। तद्वतीति। ननु घटत्ववति घटमिति प्र
मायामव्याप्तिः॥ घटत्वे घटाभावादिति चेन्न॥ यत्र यत्संबंधोस्ति तत्र तत्संबंधानुभव इत्यर्थात्। घटत्वेपि घटसंबंधोस्तीति नाव्याप्तिः॥

त. दी. ६

सएवेति यथार्थानुभवत्वशास्त्रप्रमेत्युच्यते॥ अयथार्थं लक्षयति। तदभाववति। नन्विदं संयोगीति प्रमायामतिव्याप्तिरिति
चेन्न। यदवच्छेदेन यन्नास्ति तदवच्छेदेन संबंधज्ञानस्य विवक्षितत्वात्। संयोगाभावावच्छेदेन संयोगज्ञानस्य अप्रमत्वात्॥ सं
योगावच्छेदेन संयोगसंबंधस्य विद्यमानत्वान्नातिव्याप्तिः॥ यथार्थानुभवं चैव विभजते। यथार्थेति॥ प्रसंगात्प्रमाकरणम
पि विभजते। तदिति। प्रमाकरणमित्यर्थः॥ प्रमाकरणं प्रमाणमिति। प्रमाणसामान्यलक्षणं॥ करणं लक्षयति। असाधारण
कारणेति। दिक्कालादौ अतिव्याप्तिवारणाय असाधारणेति। कारणलक्षणमाह। कार्येति। पूर्ववृत्तिकारणमित्युक्ते रास
भादावतिव्याप्तिः स्यादतो नियतेति तावन्मात्रे उक्ते कार्ये अतिव्याप्तिः अतः पूर्ववृत्तीति नन्वेतत्तन्तुरूपमपि पटं प्रतिका
रणं स्यादिति चेन्न। अनन्यथासिद्धत्वे सतीति विशेषणात्। अनन्यथासिद्धत्वं अन्यथासिद्धिविरहः। अन्यथासिद्धिश्च
वि त्रिधा। येन सह यस्य यं प्रति पूर्ववृत्तित्वमवगम्यते तेन तदन्यथासिद्धं यथा तन्तुना तन्तुरूपं तन्तुत्वं च पटं प्रति।
अन्यं प्रति पूर्ववृत्तित्वे ज्ञातेनैव यस्य यं प्रति पूर्ववृत्तित्वमवगम्यते तं प्रति तदन्यथासिद्धं यथा शब्दं प्रति पूर्ववृत्तित्वे
ज्ञाते एव घटं प्रति आकाशस्य अन्यत्र नियतपूर्ववर्तिन एव कार्यसंभवे तत्सहभूतं अन्यथासिद्धं यथा पाकजस्थले
गंधं प्रति रूपप्रागभावस्य। एवं च। अनन्यथासिद्धनियतपूर्व अनन्यथासिद्धनियतपूर्ववृत्तित्वं कारणत्वं कार्यलक्ष

त॰ दी॰

माह। कार्येति। कारणं विभजते कारणमिति समवायिकारणलक्षणमाह। यत्समवेतमिति यस्मिन्समवेतमित्यर्थः॥ असमवायिकारणं लक्षयति कार्येणेति कार्येणेत्येतदुदाहरति तंतुसंयोग इति कार्येणपटेनैकस्मिन्तंतौ समवेतत्वात् तंतुसंयोगः पटस्यासमवायिकारणमित्यर्थः कारणेनसहेत्येतदुदाहरति तंतुरूपमिति कारणेन पटेन सह एकस्मिन्तंतौ समवेतत्वात्। तंतुरूपं पटरूपस्यासमवायिकारणमित्यर्थः। निमित्तकारणं लक्षयति तदुभयेति समवाय्यसमवायिभिन्नकारणं निमित्तकारणमित्यर्थः कारणलक्षणमुपसंहरति तदेतदिति प्रत्यक्षलक्षणमाह तत्रेति प्रमाणचतुष्टयमध्ये इत्यर्थः प्रत्यक्षज्ञानस्यलक्षणमाह इंद्रियेति इंद्रियं चक्षुरादिकं अर्थो घटादिः तयोः सन्निकर्षः संयोगादिस्तज्जन्यं ज्ञानमित्यर्थः निर्विकल्पकस्यलक्षणमाह निष्प्रकारकमिति विशेषणविशेष्यसंबंधानवगाहिज्ञानमित्यर्थः ननु निर्विकल्पके किंप्रमाणमिति चेन्न गौरिति विशिष्टज्ञानं विशेषणज्ञानजन्यं विशिष्टज्ञानत्वात् दंडीति ज्ञानवदित्यनुमानस्य प्रमाणत्वात् विशेषणज्ञानस्यापि सविकल्पकत्वे अनवस्थाप्रसंगात् निर्विकल्पसिद्धिः सविकल्पं लक्षयति सप्रकारकमिति नामजात्यादिविशेषणविशेष्यसंबंधावगाहिज्ञानमित्यर्थः सविकल्पकमुदाहरति यथेति इंद्रियार्थसंनिकर्ष इत्यर्थः विभजते प्रत्यक्षेति संयोगसन्निकर्षमुदाहरति

त॰ दी॰

चक्षुषेति द्रव्यप्रत्यक्षे सर्वत्र संयोगः सन्निकर्ष इत्यर्थः आत्मा मनसा संयुज्यते मन इंद्रियेण इंद्रियमर्थेन ततः प्रत्यक्ष
ज्ञानमुत्पद्यते संयुक्तसमवायमुदाहरति घटरूपेति तत्र युक्तिमाह चक्षुः संयुक्तेति संयुक्तसमवेतस्य समवायमु
दाहरति रूपत्वेसतिसमवायमुदाहरति रूपत्वेति समवायमुदाहरति श्रोत्रेति तदुपपादयति कर्णेति ननु दूर
स्य शब्दस्य कथं श्रोत्रसंबंध इति चेन्न वीचीतरंगन्यायेन कदंबमुकुलन्यायेन वा शब्दांतरोत्पत्तिक्रमेण श्रोत्रदेशे
जातस्य श्रोत्रसंबंधात् प्रत्यक्षत्वसंभवात् समवेतसमवायमुदाहरति शब्दत्वेति विशेषणविशेष्यभावमुदाहरति
अभावेति तदुपपादयति घटाभाववदिति भूतले घटो नास्तीत्यत्र अभावस्य विशेषणत्वं द्रष्टव्यं एतेन अनुपलब्धेः
प सत्यभावावच्छिन्नत्वाद्याप्तेः भावं प्रकाशयदिंद्रियं प्राप्तमेव प्रकाशयति न त्वभावं अभावं प्रकाशयदिंद्रियं विशेषणमुखेनेति सि
द्धेतः असंबंधाभावग्रहणेऽतिप्रसंगदोषस्तु विशेषणतयैवा निरस्तः प्रमाणत्वं निरस्तं यद्यत्र घटोऽभविष्यत तदाभू
तलमिव अद्रक्ष्यत दर्शनाभावान्नास्तीति तर्कितप्रतियोगिसत्वविरोध्यनुपलब्धिसहकृतेंद्रियेणैव अभावज्ञानोपप
त्तौ अनुपलब्धेः प्रमाणांतरत्वासंभवात् अधिकरणज्ञानार्थमपेक्षणीयेंद्रियस्यैव करणत्वोपपत्तौ अनुपलब्धेः

ट
त·दी·

करणत्वस्यायुक्तत्वात् । नन्विंद्रियसंबद्धार्थग्राहकाणि नचेंद्रियाभावयोः संबंधोस्ति संयोगसमवायौ संबंधौ तौ तयोर्नस्तः द्र
व्ययोरेव संयोग इति नियमात् अभावस्य द्रव्यत्वाभावात् नापि समवायोः युतसिद्धत्वाभावात् । विशेषणविशेष्यभावः संबंध
ा वन भवति अन्योन्याश्रितत्वाभावात् संबंधो हि संबंधिभ्यां भिन्नो भवति उभयाश्रितश्च नचाविशेषणविशेष्यभावस्त
था विशेषणविशेष्यभावो विशेषणविशेष्यस्वरूपमेव नातिरिक्तः संबंधः सत्यं भावावच्छिन्नत्वाद्यापेः भावप्रकाशयदिंद्रि
यं प्राप्तमेव प्रकाशयति न त्वभावं अभावं प्रकाशयतींद्रियं विशेषणमस्येनेति सिद्धांतः असंबद्धाभावग्रहेतोतिप्रसंग
दोषस्तु विशेषणतयैव निरस्तः प्रत्यक्षज्ञानमुपसंहरन् तस्य करणमाह । एवमिति असाधारणकारणत्वात् इंद्रि
यं प्रत्यक्षज्ञानकरणमित्यर्थः प्रत्यक्षमुपसंहरति तस्मादिति अनुमानं लक्षयति अनुमितिकरणमिति अनुमिते
र्लक्षणमाह परामर्शेति ननु संशयोत्तरप्रत्यक्षेऽपि व्याप्तिस्याप्य पुरुषसंशयानंतरं पुरुषव्याप्यकरादिमान
यमिति परामर्शे सति पुरुषएवेति प्रत्यक्षजननात् न च तत्रानुमितिरेवेति वाच्यं पुरुषं साक्षात्करोमीत्यनुव्य
वसायाविरोधादिति चेन्न पक्षतासहकृतपरामर्शजन्यत्वस्य विवक्षितत्वात् सिसाधयिषाविरहसहकृतासि

ट
त·

ध्यभावः पक्षतासाध्यसिद्धिरनुमितिप्रतिबन्धिका सिद्धिसत्त्वेपि अनुमिनोमीतीच्छायां अनुमितिदर्शनात्
।सिसाधयिषोत्तेजिका ततश्चोत्तेजकाभावविशिष्टमण्यभावस्य दाहकारणत्ववत् ।सिसाधयिषाविरहस
हकृतसिद्ध्यभावस्यापि अनुमितिकारणं परामर्शं लक्षयति व्याप्तीति व्याप्तिविषयकं पक्षधर्मताज्ञानं
स परामर्श इत्यर्थः व्याप्तेर्लक्षणमाह यत्रेति यत्र धूम इति व्याप्तेरभिनयः साहचर्यनियम इति लक्षणं सा
हचर्यं सामानाधिकरण्यं तस्य नियमः हेतुसमानाधिकरणात्यन्ताभावाप्रतियोगिसाध्यसामानाधिकरण्यं
व्याप्तिरित्यर्थः पक्षधर्मतास्वरूपमाह व्याप्यस्येति स्वार्थानुमितिं दर्शयति स्वयमेवेति भूयो दर्शनेनेति
ननु पार्थिवत्वलोहलेख्यत्वादौ शतशः सहचारदर्शनेपि व्यभिचारोपलब्धेः भूयोदर्शनेन कथं व्याप्तिग्रह इ
ति चेन्न व्यभिचारज्ञानविरहसहकृतसहचारज्ञानस्य व्याप्तिग्राहकत्वात् व्यभिचारज्ञानं निश्चयः शंका च तद्वि
रहः क्वचित्तर्कात् क्वचित्स्वतःसिद्ध एव धूमाग्न्योर्व्याप्तिग्रहे कार्यकारणभावभंगप्रसंगलक्षणस्तर्कः व्यभि
चारशंकानिवर्तकः ननु सकलवह्निधूमयोः असन्निकर्षात्कथं व्याप्तिग्रह इति चेन्न धूमत्ववह्नित्वरूप
सामान्यप्रत्यासत्त्या सकलधूमवह्निज्ञानसंभवात् तस्मादिति लिंगपरामर्शादित्यर्थः परार्थानुमानमा

ह यत्स्विति पक्षस्य तत्परार्थानुमानमिति तद्वच्छेदेनान्वयः पंचावयववाक्यमुदाहरति यथेति अवयवस्व
रूपमाह प्रतिज्ञेति उदाहृतवाक्ये प्रतिज्ञाविशेषमाह पर्वतो वह्निमानिति साध्यवत्तया पक्षवचनं प्रतिज्ञा पंच
म्यंतं लिंगप्रतिपादकं हेतुः व्याप्तिप्रतिपादकं उदाहरणं पक्षधर्मताज्ञानार्थमुपनयः अबाधितत्वादिकं निगम
नप्रयोजनं अनुमितिकरणमाह स्वार्थेति ननु व्याप्तिस्मृतिपक्षधर्मताज्ञानाभ्यामेवानुमितिसंभवे विशिष्टपरा
मर्शः किमर्थमंगीकर्त्तव्य इति चेन्न वह्निव्याप्यधूमवानयमिति शब्दपरामर्शस्थले परामर्शस्यावश्यकतया
लाघवेन सर्वत्र परामर्शस्यैव कारणत्वात् लिंगं न करणं अतीतादौ व्यभिचारात् व्यापारवत्कारणं करणमिति
मते परामर्शद्वारा व्याप्तिज्ञानं करणं तज्जन्यत्वे सति तज्जन्यजनको व्यापारः अनुमानमुपसंहरति तस्मादिति लिं
गं विभजते लिंगमिति अन्वयव्यतिरेकि लक्षयति अन्वयमिति हेतुसाध्ययोर्व्याप्तिरन्वयव्याप्तिः तदभावयोर्व्याप्तिर्व्य
तिरेकव्याप्तिः केवलान्वयिनो लक्षणमाह अन्वयेति केवलान्वयिसाध्यकं केवलान्वयि अत्यंताभावाप्रतियोगित्वं
केवलान्वयित्वं केवलान्वयिनमुदाहरति घटोऽभिधेय इति ईश्वरप्रमाविषयत्वं सर्वदाभिधेयत्वं सर्वत्रास्तीति व्य
तिरेकाभावः व्यतिरेकिलक्षणमाह व्यतिरेकेति व्यतिरेकिणमुदाहरति पृथिवीति ननु इतरभेदः प्रसिद्धो न वा
आद्ये यत्र प्रसिद्धस्तत्र हेतुसत्त्वे अन्वयित्वं असत्त्वे असाधारणत्वं द्वितीये साध्यज्ञानाभावात् कथं तादृशानुमितिः

विशेषणज्ञानाभावे विशिष्टज्ञानानुदयात् प्रतियोगिज्ञानाभावात् व्यतिरेकव्याप्तिज्ञानमपि तस्मादिति चेन्न
जलादित्रयोदशान्योन्याभावानां त्रयोदशसु प्रत्येकं प्रसिद्धानां मेलनं पार्थिव्यां साध्यते तत्र त्रयोदशत्वावच्छि
न्नासाध्यत्वकाधिकरणाव्यतित्वाभावात् नान्वयित्वासाधारण्ये प्रत्येकाधिकरणप्रसिद्ध्या साध्यस्यैकवि
शिष्टानुमिति साध्याव्यापकीभूताभावप्रतियोगित्वमिति व्यतिरेकिव्याप्तिनिरूपणं चेति पक्षलक्षणमाह
संदिग्धेति ननु श्रवणानन्तरं आविमननस्थले अव्याप्तिः तत्र वाक्यैरात्मनो निश्चितत्वे संदेहाभावात् किंच प्र
त्यक्षेपि वह्नेयते इच्छाया अनुमिति तत्र अव्याप्तिरिति चेन्न उक्तपक्षताश्रयत्वस्य पक्षलक्षणत्वात् सपक्षलक्ष
णमाह निश्चितेति विपक्षलक्षणमाह निश्चितेति एवं सद्धेतून्निरूप्य असद्धेतून्निरूपयितुं विभजते सव्यभिचारेति
अनुमितिप्रतिबंधकायथार्थज्ञानाविषयत्वं हेत्वाभासत्वं सव्यभिचारं विभजते सत्रिविध इति साधारणं लक्ष
यति तत्रेति उदाहरति यत्रेति असाधारणं लक्षयति सपक्षेति अनुपसंहारिणो लक्षणमाह अन्वयेति विरु
द्धं लक्षयति साध्येति सत्प्रतिपक्षं लक्षयति यस्येति असिद्धं विभजते असिद्ध इति आश्रयासिद्ध इति आश्रयासिद्ध

१
त॰ दी॰

ममुदाहरति गगनेति स्वरूपासिद्धमुदाहरति शब्द इति व्याप्यत्वासिद्धस्य लक्षणमाह सोपाधिक इ
ति उपाधिलक्षणमाह साध्येति उपाधिश्चतुर्विधः केवलसाध्यव्यापकः पक्षधर्मावछिन्नसाध्यव्यापकः
साधनावछिन्नसाध्यव्यापकः उदासीनधर्मावछिन्नसाध्यव्यापकश्चेति आद्यः आर्द्रेन्धनसंयोगः द्वितीयो
यथा वायुः प्रत्यक्षः प्रमेयत्वादित्यत्र बहिर्द्रव्यत्वावछिन्नमनित्यत्वव्यापकंरूपवत्वं बाधितस्य लक्षणमाह यस्ये
ति अत्र बाधस्य ग्राह्याभावनिश्चयत्वेन सत्प्रतिपक्षस्य विरोधिज्ञानसामग्रीत्वेन साक्षादनुमितिप्रतिबंधकत्वं
इतरेषां तु परामर्शप्रतिबंधकत्वं तत्रापि साधारणस्याव्यभिचाराभावतया विरुद्धस्य सामानाधिकरण्याभावतया
व्याप्यत्वासिद्धस्य विशिष्टव्याप्याभावतया असाधारणानुपसंहारिणोः व्याप्तिसंशयाजनकत्वेन व्याप्तिज्ञानप्र
तिबंधकत्वं आश्रयासिद्धिस्वरूपासिद्ध्योः पक्षधर्मताज्ञानप्रतिबंधकत्वं उपाधेस्तु व्यभिचारज्ञानद्वारा व्या
प्तिज्ञानप्रतिबंधकः सिद्धसाधनं तु पक्षताविघटकतया आश्रयासिद्धेरंतर्भवति। निग्रहस्थानांतराभितिनः
वीनाः उपमानं लक्षयति उपमितीति शब्दं लक्षयति आप्तेति पदलक्षणमाह शक्तमिति अर्थः स्मरत्यनुभूतं

त॰ दी॰

पदपदार्थसंवंधः शक्तिः साच पदार्थांतरमिति मीमांसकाः तन्निरासार्थमाह अस्मादिति ।डित्थादीनामिव घटादीनाम
पि संकेत एव शक्तिः नतु पदार्थांतरमित्यर्थः घटादिपदानां घटत्वादिजातावेव शक्तिः ननु पदार्थांतरमित्यर्थः गवादि
शब्दानां जातावेव शक्तिः ।विशेषणतया जातेः प्रथममुपस्थितत्वात् व्यक्तिलाभस्तु आक्षेपादिना इति केचित् तन्न गामान
येत्यादौ वृद्धव्यवहारे सर्वत्रानयनादेर्व्यक्तावेव संभवेन जातिविशिष्टव्यक्तावेव शक्तिकल्पनात् शक्तिग्रहश्च वृद्ध
व्यवहारेण व्युत्पित्सुर्वालो गामानयेत्युत्तमवृद्धवाक्यश्रवणानंतरं मध्यमवृद्धस्य प्रवृत्तिमुपलभ्य गामानयनंच
दृष्ट्वा मध्यमवृद्धप्रवृत्तिजनकज्ञानस्य अन्वयव्यतिरेकाभ्यां वाक्यजन्यत्वं निश्चित्य अश्वमानय गां वधानेति वाक्यांतरे
आवापोद्वापाभ्यां गोपदस्य गोत्वविशिष्टे शक्तिः अश्वपदस्य अश्वत्वविशिष्ट इति व्युत्पद्यते ननु सर्वत्र कार्यपरत्वात् व्य
वहारस्य कार्यवाक्य एव व्युत्पत्तिः नासिद्धपदे इति चेन्न काश्यां त्रिभुवनतिलको भूपतिरित्यादौ सिद्धेपि व्यवहारात् विक
सितपद्मे मधुकर इत्यादौ सिद्धपदसमभिव्याहारात् सिद्धेपि मधुकरादिव्युत्पत्तिदर्शनाच्च लक्षणापि शब्दवृत्तिः ॥
वाक्यसंवंधो लक्षणा गंगायां घोष इत्यत्र गंगापदवाच्यप्रवाहसंवंधादेव तीरोपस्थितौ तीरेपि शक्तिर्न कल्प्य
ते सैंधवादौ लवणाश्वयोः परस्परसंवंधाभावेन नानाशक्तिकल्पने लक्षणा त्रिविधा जहल्लक्षणा अजहल्लक्षणा
जहदजहल्लक्षणा चेति यत्र वाच्यार्थस्यान्वयाभावः तत्र जहदिति यथा मंचाः क्रोशंतीति अत्र वाच्यस्याप्यन्वयः तत्राज
हदिति यथा छत्रिणो गच्छंतीति यत्र वाच्यैकदेशत्यागेन एकदेशान्वयः तत्र जहदजहदिति यथा तत्वमसीति गो

ल्पापि लक्षणैव लक्ष्यमाह॥ गुणसंबंधरूपा अग्निर्माणवक इति व्यंजनापि शक्तिलक्षणांतर्भूता अर्थशक्तिः म
लाच अनुमानादिनान्यथासिद्धा तात्पर्यानुपपत्तिर्लक्षणाबीजं तत्प्रतीतीछयाउच्चरितत्वं तात्पर्यं तात्पर्यज्ञानंच
वाक्यार्थज्ञानहेतुः नानार्थानुरोधात् प्रकरणादिकं तात्पर्यग्राहकं द्वारमित्यादौ पिधेहि
पिशब्दाध्याहारः ननु अर्थज्ञानार्थत्वात् शब्दस्य अर्थमविज्ञाय शब्दाध्याहारासंभवात् अर्थाध्याहार एव युक्त इ
ति चेन्न पदविशेषजन्यपदार्थोपस्थितेः शब्दज्ञानहेतुत्वात् अन्यथा घटः कर्मत्व आनयनं कृतिरित्यत्रापि शाब्द
ज्ञानप्रसंगात् पंकजादिपदेषु योगरूढिः अवयवशक्तिर्योगः समुदायशक्ती रूढिः नियतपद्मत्वज्ञानार्थं समुदा
२३ यशक्तिः अन्यथा कुमुदेपि प्रयोगप्रसंगः इतरान्विते शक्तिरिति प्राभाकराः अन्वयस्य वाक्यार्थतया भानसंभवात् अन्व
यांशेपि शक्तिर्न कल्पनीयेति गौतमीयाः आकांक्षेति आकांक्षादिज्ञानमित्यर्थः अन्यथा आकांक्षादिभ्रमात् शाब्दभ्रमो न
स्यात् आकांक्षां लक्षयति पदस्येति योग्यतां लक्षणमाह अर्थेति सन्निधिं लक्षणमाह पदानामिति अविलंबेन प
दार्थोपस्थितिः सन्निधिः उच्चारणं तु तदुपयोगितयोक्तं गौरश्व इति घटः कर्मत्वमित्यनाकांक्षोदाहरणं द्रष्ट
व्यं वैदिकस्य विशेषमाह वैदिकं ईश्वरोक्तत्वादिति ननु वेदस्य अनादित्वात् कथं ईश्वरोक्तत्वमिति चेन्न वेदः पौरु
षेयः वाक्यसमूहत्वात् भारतादिवत् इत्यनुमानेन पुरुषोक्तत्वसिद्धेः नचास्मर्यमाणकर्तृत्वं उपाधिः गौतमादि
भिः शिष्यपरंपरया वेदेपि कर्तृकत्वस्मरणेन साधनव्यापकत्वात् तस्मान्मंत्रात् यो वेदा अजायंत इति श्रुतेश्च

२१
तो॰सं॰

ननु वर्णा नित्याः स एवायं गकार इति प्रत्यभिज्ञाबलात् तथा च कथं वेदस्य अनित्यत्वमिति चेन्न उत्पन्नो गका
रो नष्टो गकार इति प्रतीत्या वर्णानामनित्यत्वात् सोयं गकार इति प्रत्यभिज्ञायाः सेयं दीपज्वालेतिवत् जात्याल
वनत्वात् वर्णानामनित्यत्वेपि आनुपूर्वीविशिष्टवाक्यस्यानित्यत्वाच्च तस्मादीश्वरोक्तो वेदः मन्वादिस्मृतीनामा
चाराणां च वेदमूलकतया प्रामाण्यं स्मृतिमूलवाक्यानामिदानीमनध्ययनात् तन्मूलकताकारैश्चिरंखोत्सं
गेनेति कल्प्यते ननु पठ्यमानवेदवाक्योत्सादस्य कल्पयितुमशक्यतया विप्रकीर्णवादस्यायुक्तत्वात् नित्या
नुमेयो वेदो मूलमिति चेन्न तथापि वर्णानुपूर्वज्ञानाभावेन बोधकत्वासंभवात् ननु एतानि पदानि स्मारितार्थसंस
र्गवंति आकांक्षादिमत्पदकदंबकत्वात् मद्वाक्यवत् इत्यनुमानादेव संसर्गज्ञानसंभवात् शब्दो न प्रमाणांतरम
मिति चेन्न अनुमित्यपेक्षया शाब्दज्ञानस्य विलक्षणस्य शब्दात्प्रत्येमि इत्यनुव्यवसायादिकस्य सर्वसंमतत्वात् नन्वर्था
पत्तिरपि प्रमाणांतरमस्ति पीनो देवदत्तो दिवा न भुंक्ते इति दृष्टे श्रुते वा पीनत्वान्यथानुपपत्त्या रात्रिभोजनमर्थापत्त्या
कल्प्यत इति चेन्न देवदत्तो रात्रौ भुंक्ते दिवाभुंजानत्वे सति पीनत्वात् इत्यनुमानेनैव रात्रिभोजनस्य सिद्धत्वात् शते
व पंचाशदिति संभवोप्यनुमानमेव इह वटे यक्षोस्ति इत्यैतिह्यमपि अज्ञातमूलकशब्द एव चेष्टापि शब्दानुमान
द्वारा व्यवहारहेतुरिति न मानांतरं तस्मात्प्रत्यक्षानुमानोपमानशब्दाख्यानि चत्वार्येव प्रमाणानि ज्ञानानां तद्वितितत्र

कारत्वं स्वतो ग्राह्यं परतो वेति विचार्यते तत्र विप्रतिपत्तिः ज्ञानप्रामाण्यं तदप्रामाण्याग्राहकयावत्ज्ञानग्राहकसामग्री।
ग्राह्यं न वा अत्र विधिकोटिः स्वतस्त्वं निषेधकोटिः परतस्त्वं अनुमानग्राह्यत्वेन सिद्धसाधनवारणाय यावदिति इदं
ज्ञानमप्रमेति ज्ञानेन प्रामाण्याग्राहात् बाधवारणाय अप्रामाण्याग्राहकेति इदं ज्ञानमप्रमेत्यनुव्यवसायस्याप्रा
माण्यग्राहकस्य अप्रामाण्याग्राहकत्वाभावात् स्वतस्त्वं न स्यात् अतस्तदिति तस्मिन् प्रामाण्ये अप्रामाण्याग्राह्यत्वमर्थः उ
दाहृतस्थले व्यवसाये अप्रामाण्यग्राहकस्यापि अनुव्यवसाये तदग्राहकत्वात् स्वतस्त्वसिद्धिः ननु स्वतः प्रामाण्यं गृ
ह्यते घटमहं जानामीत्यनुव्यवसायेन घटघटत्वयोरिव संबंधस्यापि विषयीकरणात् व्यवसायरूपप्रत्यासत्ते
स्तुल्यत्वात् पुरोवर्तिनि तत्प्रकारसंबंधस्यैव प्रमात्वपदार्थत्वादिति चेन्न स्वतःप्रामाण्यग्रहे जलज्ञानं प्रमा न वेत्य
नभ्यासदशायां प्रमात्वसंशयो न स्यात् अनुव्यवसायेन प्रामाण्यस्य निश्चितत्वात् तस्मात् स्वतोऽग्राह्यत्वाभावात् परतोग्रा
ह्यत्वं तथाहि प्रथमं जलज्ञानानंतरं प्रवृत्तौ सत्यां जललाभे सति पूर्वोत्पन्नं जलज्ञानं प्रमा समर्थप्रवृत्तिजनकत्वात् य
न्नैवं तन्नैवं यथा अप्रमेति व्यतिरेकिणा प्रमात्वं निश्चीयते द्वितीयादिज्ञानेषु पूर्वज्ञानदृष्टांतेन तत्सजातीयत्वलिंगेन
अन्वयव्यतिरेकिणापि गृह्यते प्रमायाः गुणजन्यत्वमुत्पत्तौ परतस्त्वं प्रमासाधारणं कारणं गुणः अप्रमासाधारणका
रणं दोषः तत्र प्रत्यक्षे विशेषणविशेष्यसन्निकर्षो गुणः अनुमितौ व्यापकवति व्याप्यज्ञानं उपमितौ यथार्थसा

दृश्यज्ञानं शाब्दज्ञाने यथार्थयोग्यताज्ञानमित्याद्यूहनीयं पुरोवर्त्तिनि प्रकाराभावस्याव्यवसायेनानुपस्थितत्वात्
अप्रमात्वं परतो गृह्यते पित्तादिदोषजन्यत्वादुत्पत्तौ परस्त्वं ननु सर्वज्ञानानां यथार्थत्वात् अयथार्थज्ञानमेव नो
स्ति न च शुक्ताविदं रजतमिति ज्ञानात्प्रवृत्तिदर्शनादन्यथाख्यातिसिद्धिरिति वाच्यं रजतस्मृतिपुरोवर्त्तिज्ञानाभ्या
मेव प्रवृत्तिसंभवात् उपस्थितेष्टभेदाग्रहस्यैव सर्वत्र प्रवर्त्तकत्वेन नेदं रजतमित्यादावतिप्रसंगाभावादिति चेन्न
सत्यरजतस्थले पुरोवर्त्तिनि विशेष्यक रजतत्वप्रकारकज्ञानस्य लाघवेन प्रवृत्तिजनकतया शुक्तावपि रजतार्थि
प्रवृत्तिजनकत्वेन विशिष्टज्ञानस्यैव कल्पनात् अयथार्थानुभवं विभजते अयथार्थेति स्वप्नस्य मानसविपर्ययरूपत्वा
त् नैवंविध्यविरोधः संशयलक्षणमाह एकेति घटपटाविति समूहालंबनातिव्याप्तिवारणाय एकेति घटो द्रव्यमि
त्यादावतिव्याप्तिवारणाय विरुद्धेति पटत्वविरुद्धघटत्ववानित्यज्ञातिव्याप्तिवारणाय नानेति विपर्ययलक्षणमाह मिथ्ये
ति तदभाववति तत्प्रकारकज्ञानमयथार्थः तर्कं लक्षयति व्याप्येति यद्यपि तर्को विपर्यये अंतर्भवति तथापि प्रमाणानुग्रा
हकत्वात्तद्भेदेन कीर्त्तनं स्मृतिं विभजते स्मृतिरिति सुखं लक्षयति सर्वेषामिति सुखं हमित्याद्यनुव्यवसायगम्यसु
खत्वादिकमेव लक्षणं यथाश्रुतं तु स्वरूपकथनमिति द्रष्टव्यं संस्कार इति संस्कारत्वजातिमान् संस्कारः वेगस्याश्राय
माह वेग इति वेगत्वजातिमान् वेगः भावनां लक्षयति अनुभवेति आत्मादावतिव्याप्तिवारणाय अनुभवेति अनुभ
व ध्वंसे अतिव्याप्तिवारणाय स्मरतीति स्मृतेरपि संस्कारजनकत्वेन नवीनैरुक्तत्वात् स्थितस्थापकं लक्षयति अन्यथेति संस्था

दयोस्ते नैमित्तिकद्रवत्ववेगस्थितस्थापकाः सामान्यगुणाः अन्ये रूपादयो विशेषगुणाः द्रव्यविभाजकोपाधिद्वयसमा
नाधिकरणावृत्तिजातिमत्त्वं विशेषगुणत्वं कर्मणो लक्षणमाह चलनेति उत्क्षेपणादीनां कार्यभेदमाह ऊर्ध्वेति शरीरे
ति वक्रतासंपादकमाकुंचनं ऋजुतासंपादकं प्रसारणमित्यर्थः सामान्यं लक्षयति नित्यमिति परमाणुपरिमा
णादौ अतिव्याप्तिवारणाय अनेकेति अनुगतत्वं समवेतत्वं तेन अभावादावतिव्याप्तिः विशेषं लक्षयति नित्येति समवायं
लक्षयति नित्य इति संयोगे अतिव्याप्तिवारणाय नित्य इति आकाशादावतिव्याप्तिवारणाय संबंध इति अयुतसिद्धिं ल
क्षणमाह ययोरिति नीलो घट इति विशिष्टप्रतीतिः विशेषणविशेष्यसंबंधविषयः विशिष्टप्रत्ययत्वात् दंडीति
प्रत्ययवत् इति समवायसिद्धिः अवयवावयविनौ इति द्रव्यसमवायीकारणमवयवः जन्यद्रव्यमवयवि प्रागभा
वं लक्षयति अनादिरिति आकाशादावतिव्याप्तिवारणाय सांत इति घटादावतिव्याप्तिवारणाय अनादिरिति प्रतियोगिस
मवायिकारणवृत्तिः प्रतियोगिजनकः भविष्यतीति व्यवहारहेतुः प्रागभावः ध्वंसं लक्षयति सादिरिति घटादावतिव्या
प्तिवारणाय अनंत इति आकाशादावतिव्याप्तिवारणाय सादिरि प्रतियोगिजन्यः प्रतियोगिसमवायवृत्तिः ध्वस्तव्य
हारहेतुः ध्वंसः अत्यंताभावं लक्षयति त्रैकालिक इति अन्योन्याभावे अतिव्याप्तिवारणाय संसर्गावच्छिन्नेति ध्वंस
प्रागभावयोरतिव्याप्तिवारणाय त्रैकालिक इति अन्योन्याभावं लक्षयति तादात्म्येति प्रतियोगितावच्छेदकव्यापारो

व्यसंसर्गाभेदादेकप्रतियोगिकयोरत्यंताभावान्योन्याभावयोः बहुत्वे केवलदेवदत्ताभावादंडाभाव इति प्रतीत्या विशि
ष्टाभावः एकत्वसत्वे द्वौ न स्त इति प्रतीत्या द्वित्वावच्छिन्नप्रतियोगिकाभावः संयोगसंबंधेन घटवति समवायसंबंधेन
घटाभावः तत्र घटाभावात् घटत्वावच्छिन्नप्रतियोगिकत्वे सामान्यादावव्याप्तिवारणाय गुणेति रूपादावतिव्याप्तिवारणा
य पिंडीभावेति शब्दं लक्षयति श्रोत्रेति शब्दत्वेऽतिव्याप्तिवारणाय गुण इति रूपादावतिव्याप्तिवारणाय श्रोत्रेति शब्द
स्त्रिविधः संयोगजो विभागजश्चेति तत्राद्यः भेरीदंडसंयोगजन्यः द्वितीयः वंशे पाट्यमाने दलद्वयविभागजन्यश्चट
चटशब्दः भेर्यादिदेशमारभ्य श्रोत्रपर्यंतं द्वितीयादिशब्दाः शब्दजाः बुद्धेर्लक्षणमाह बुद्धिरिति जानामीत्यनुव्यवसा
यगम्यज्ञानत्वमेव लक्षणमित्यर्थः बुद्धिं विभजते सेति स्मृतिं लक्षणमाह संस्कारेति भावनाख्यः संस्कारः संस्कारध्वं
सेऽतिव्याप्तिवारणाय ज्ञानमिति घटादिप्रत्यक्षेऽतिव्याप्तिवारणाय संस्कारजन्यमिति अनुभवं लक्षयति तद्भिन्नमि
ति स्मृतिभिन्नज्ञानमनुभवः अनुभवं विभजते तद्द्विविध इति यथार्थानुभवस्य लक्षणमाह तद्वतीति ननु घटे घट
त्वमिति प्रमायामतिव्याप्तिवारणाय घटत्वे घटाभावादिति चेन्न यत्र यत्संबंधोऽस्ति तत्र तत्संबंधानुभव इत्यर्थात् घटत्वे
ऽपि घटसंबंधोऽस्तीति नाव्याप्तिः सैवेति यथार्थानुभव एव शास्त्रे प्रमेत्युच्यते इत्यर्थः अयथार्थं लक्षयति तदभाव
वतीति ननु इदं संयोगीति प्रमायामतिव्याप्तिरिति चेन्न यदवच्छेदेन यत्संबंधाभावः तदवच्छेदेन तत्संबंधज्ञानस्य विवक्षित
त्वात् संयोगाभावावच्छेदेन संयोगज्ञानस्य भ्रमत्वात् संयोगावच्छेदेन संयोगसंबंधस्य सत्वान्नातिव्याप्तिः यथार्थानुभवं वि

भजते यथार्थेति प्रसंगात् प्रमाकरणं विभजते तत्करणमिति प्रमाकरणमित्यर्थः प्रमाकरणं प्रमाणमिति प्रमाणसामान्य
लक्षणमाह असाधारणेति साधारणाव्यतिरिक्तः एवमन्योन्याभावो घटत्वावच्छिन्नपटो नास्तीति व्यधिकरणधर्माभा
वव्याप्तिप्रसंगप्रतिदृष्टांतअनुत्पत्तिसंशयप्रकरणदेतत्पर्यायत्वविशेषोपलब्ध्यनुपलब्धिकारणानित्यानित्यकार्यस
मा जातयः वादिनोऽपजयहेतुः निग्रहस्थानं प्रतिज्ञाहानिप्रतिज्ञान्तरं प्रतिज्ञाविरोधः प्रतिज्ञासंन्यासः हेत्वंतरं निर
र्थकं अविज्ञातार्थं अपार्थकं अप्राप्तकालं न्यूनं अधिकं पुनरुक्तं अननुभाषणं अज्ञानं अप्रतिभा विक्षेप मतानुज्ञा पर्यनुयो
ज्यापेक्षणं निरनुयोज्यानुयोगः अपसिद्धांतः हेत्वाभासश्च निग्रहस्थानानि शेषं सुगमं ननु करतलानलसंयोगस्य
योसत्त्वपि प्रतिबंधके सत्यदाहानुत्पत्तेः शक्तिः पदार्थांतरमिति चेन्न प्रतिबंधकाभावस्य कार्यमात्रे कारणत्वेन श
क्तेरनुपयोगात् कारणस्यैव शक्तिपदार्थत्वात् ननु भस्मादिना कांस्यादेः शुद्धिदर्शनात् आधेयशक्तिरंगीकार्येति
चेन्न भस्मादिसंयोगसमानकालीनअस्पृश्यस्पर्शप्रतियोगिकयावदभावसहितभस्मादिसंयोगध्वंसस्यैव शुद्धपदार्थत्वा
त् स्वमपि न पदार्थांतरम् यथेच्छविनियोगयोग्यत्वस्य स्वत्वरूपत्वात् तदवच्छेदकं च प्रतिग्रहादिलब्धत्वमेवेति अथ विधि
र्निरूप्यते प्रवृत्तिजनकचिकीर्षाजनकज्ञानविषयो विधिः तत्प्रतिपादको लिङादिर्वा इष्टसाधनत्वप्रवृत्तिदर्शनात् इ
ष्टसाधनताज्ञानस्य काम्यस्थले विहितकालजीवित्वनिमित्तज्ञानजन्यस्य नित्यनैमित्तिकस्थले प्रवर्तकत्वात् न चाऽनुगमः
स्वविशेषणवत्ताप्रतिसंधानजन्यत्वस्य अनुगतत्वादिति गुरवः तन्न लाघवेन इष्टसाध्यत्वेष्टसाधनताज्ञानस्यैव चिकीर्षा

प्रवर्तकं न च विषभक्षणे प्रवृत्तिप्रसंगः इष्टसाधनतालिंगककृतिसाध्यताज्ञानस्य र

द्वाराप्रफलजनकत्वात् नचनित्येष्टसाधनत्वाभावादप्रवृत्तिप्रसंगः तत्रापिप्रत्यवायपरिहारस्यपापक्षयस्यचफलत्व
कल्पनात् तस्मात्कार्यत्वमिष्टसाधनत्वमेवालिङ्डाद्यर्थः ननुज्योतिष्टोमेनस्वर्गकामोयजेतेत्यत्रलिङास्वर्गसाधनका
र्यंप्रतीयते यागस्याशुविनाशिनः कालांतरभाविस्वर्गसाधनत्वायोग्यत्वात् यागस्यापिकार्यमपूर्वमेवलिंगार्थः कार्य
त्वमिष्टसाध्यंकृतेःसविषयत्वात् विषयाकांक्षायांयोगोविषयत्वेनान्वेति कस्यकार्यमितिनियोज्याकांक्षायांस्वर्गकामपदंनियो
ज्यपरतयान्वेति कार्यबोद्धानियोज्यः तेनज्योतिष्टोमनामकयागविषयंस्वर्गकामस्यकार्यमितिवाक्यार्थः संपद्यते वैदिक
लिंगत्वात् यावज्जीवमग्निहोत्रंजुहुयादितिनित्यवाक्येपिअपूर्वमेववाक्यार्थःकल्प्यते आरोग्यकामोभेषजंपानंकुर्यादित्या
दौलौकिकलिंगः क्रियाकार्यत्वलक्षणोतिचेन्न यागस्यायोग्यताभावेनिश्चयाभावेनसाधनतयाप्रतीत्यनंतरं तन्निर्वाहार्थमन्
वांतरव्यापारतयाऽपूर्वकल्पनात् कीर्तनादितिनानाशक्तिः नयागध्वंसोव्यापारः लोकव्युत्पत्तिवलात् क्रियायाएव
सातिशयकेत्वंपचतिपाकंकरोतिविवर्णादर्शनात् किंकरोतीतिप्रश्नस्यप्रपन्नार्थकत्वनिश्चयात् रथोगच्छतीत्यादौअनुकूलव्य
व्यापारेनपच्यतेऽन्नः इत्यादौकर्तृकर्मणोर्नाख्यातार्थत्वे किंतुदेवदत्तः प्रजयतीत्यादौधातोरेवप्रकर्षेशक्तिः उपस
र्गाणांपदार्थज्ञानस्यपरमप्रयोजनंमोक्षः तथाहि आत्मावाअरेद्रष्टव्यः तव्यइतिश्रुत्याश्रवणादीनांसाक्षात्कारहेतुत्वबोध
नात् श्रीश्रुत्यादेहादिविलक्षणात्मज्ञानेसत्यपिअसंभावनानिवृत्तेः युक्त्यनुसंधानरूपमननसाध्यत्वात् मननोपयोगि
पदार्थनिरूपणद्वाराशास्त्रस्यापिमोक्षोपयोगः तदनंतरंश्रुत्योपदिष्टयोगविधिनिदध्यासनेक्तेतेतदनंतरदेहादिविल

तोण त्वसाक्षात्कारे सति देहादौ वहमिति मानरूपमिथ्याज्ञाननाशेशॅति दोषाभावात् प्रवृत्त्यभावे धर्माधर्मयोरभावात् जन्मा
न्माभावे पूर्वधर्माधर्मयोरनुभवेन नाशे चरमादुःखध्वंसलक्षणो मोक्षो जायते ज्ञानमेव मोक्षसाधनं मिथ्याज्ञाननिवृत्
त्तेः ज्ञानमात्रसाध्यत्वात् तमेव विदित्वाति मृत्युमेति नान्यः पंथा विद्यतेयनायेति साधनांतरनिषेधा ननु तत्त्वापि देह
विज्ञानं कर्म चोक्तं महामुने इति कर्मणोपि मोक्षसाधनत्वस्मरणात् ज्ञानकर्मणोः समुच्चय इति चेन्न नित्यनैमित्तिके
रेव कुर्वाणो दुरितक्षयं ज्ञानं विमलीकुर्वन्नभ्यासेन च पाचयेत् अभ्यासात् पक्वविज्ञानं कैवल्यं लभते नर इत्यादिना क
र्मणो ज्ञानसाधनत्वप्रतिपादनात् ज्ञानद्वारेव कर्म मोक्षसाधनं न साक्षात् तस्मात् पदार्थज्ञानान्मोक्षः परमप्रयोजनमितिस
र्वरमणीयं॥ इति श्रीमदन्नंतदोपाध्यायकृततर्कसंग्रहटीका दीपिका समाप्ता॥ शुभं भूयात्॥

881

Tarkasangraha

(44)